# अनुक्रमणिका


| क्रम संख्या | विषय | पृष्ठ संख्या |
| --- | --- | --- |
| 1 | प्रातः स्मरणम् | 2 |
| 2 | गायत्री मन्त्रः | 3 |
| 3 | साधक प्रार्थना | 3 |
| 4 | Universal Prayer | 4 |
| 5 | तोटकाष्टकम् | 5-6 |
| 6 | वेदान्तकक्षा प्रार्थना | 7 |
| 7 | शङ्करारति | 8 |
| 8 | श्रीगुरु स्तोत्रम् | 9-10 |
| 9 | मेधा सूक्तम् | 11-12 |
| 10 | देवता प्रार्थना | 13-14 |
| 11 | सत्सङ्ग शान्तिमन्त्राः | 15 |
| 12 | देवापराध क्षमापन स्तोत्र | 16-17 |


www.radheradheje.com

## ॥ प्रातः स्मरणम् ॥

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयत्यखिल-शक्तिधरः स्वधाम्ना।
अन्यांश्च हस्त-चरण-श्रवण-त्वगादीन्
प्राणान् नमो भगवते पुरुषाय तुभ्यम् ॥

प्रातः स्मरामि हृदि संस्फुरदात्म-तत्त्वं
सच्चित्सुखं परम-हंस-गतिं तुरीयम् । यत्स्वप्न-जागर-सुषुप्तिमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसङ्घः **॥ १ ॥**

प्रातर्भजामि मनसा वैचसामर्गम्य
वाचो विभान्ति निखिला यदनुग्रहेण।
यं नेति नेति वचनैर्निगमा अवोचु-स्तं देव-देवमजमच्युतमाहुरग्र्यम् **॥ २ ॥**

प्रातर्नमामि तमसः परमर्क-वर्ण
पूर्ण सनातन-पदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजङ्गम इव प्रतिभासितं वै **॥ ३॥**

श्लोक-त्रयमिदं पुण्यं लोक-त्रय-विभूषणम्।
प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् **॥४।।**

ॐ ब्रह्मा मुरारिस्त्रिपुरान्त-कारी
भानुः शशी भूमि-सुतो बुधश्च।
गुरुश्च शुक्रः शनि-राहु-केतवः
सर्वे ग्रहाः शान्ति-करा भवन्तु ॥

## ।। गायत्री मंत्र ।।

ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यम्।
भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

## ।। साधक प्रार्थना।।

करो रक्षा विपत्ति से, न ऐसी प्रार्थना मेरी।
विपत से भय नहीं पाऊँ, प्रभु यह प्रार्थना मेरी **॥१॥**

मिले दुख ताप से शान्ति, न ऐसी प्रार्थना मेरी।
सभी दुख से विजय पाऊँ, प्रभु यह प्रार्थना मेरी **॥२॥**

मदद पर कोई आ जावे, न ऐसी प्रार्थना मेरी।
न टूटे आत्मबल डोरी, प्रभु यह प्रार्थना मेरी **॥३॥**

उठा ले भार तो मेरा, न ऐसी प्रार्थना मेरी।
बनूँ समर्थ उठाने में, प्रभु यह प्रार्थना मेरी **॥४॥**

बढे धन-धान्य परिवारा, न ऐसी प्रार्थना मेरी।
रहूँ समभावी सन्तोषी, प्रभु यह प्रार्थना मेरी **॥५॥**

मिले मन्त्र-तन्त्र की सिद्धि, न ऐसी प्रार्थना मेरी।
खिले भक्ति से शक्ति वह, प्रभु यह प्रार्थना मेरी **॥६॥**

सुखी दिन में भजूँ तुझको, दुखी अन्धेरी रात्रि में।
न आवे तुम प्रति शङ्का, प्रभु यह प्रार्थना मेरी **॥७॥**

## **Oh Adorable Lord of Universe**

(Universal Prayer by Swami Sivananda)

O, Adorable Lord of Mercy and Love!
Salutations and prostrations unto Thee.
Thou art Omnipresent, Omnipotent and Omniscient.
Thou art Satchidananda
(Existence-Consciousness-Bliss Absolute).

Thou art the Indweller of all beings.
Grant us an understanding heart, equal vision, balanced mind, faith, devotion and wisdom.
Grant us inner spiritual strength to resist temptations and to control the mind.
Free us from egoism, lust, greed, hatred, anger and jealousy.
Fill our hearts with divine virtues.

Let us behold Thee in all these names and forms.
Let us serve Thee in all these names and forms.
Let us ever remember Thee.
Let us ever sing Thy glories.
Let Thy Name be ever on our lips.
Let us abide in Thee for ever and ever.

OM TAT SAT

## **॥ तोटकाष्टकम् ॥**

विदिताखिल-शास्त्र-सुधा-जलधे
महितोपनिषत्-कथितार्थ-निधे।
हृदये कलये विमलं चरणं
भव शङ्कर-देशिक मे शरणम्**॥१॥**

करुणा-वरुणालय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचयाखिल-दर्शन-तत्त्व-विदं
भव शङ्कर-देशिक मे शरणम् **॥२॥**

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारुमते।
कलयेश्वर-जीव-विवेक-विदं
भव शङ्कर-देशिक मे शरणम् **॥३॥**

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शङ्कर-देशिक मे शरणम् **॥४॥**

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीनमिमं परिपालय मां
भव शङ्कर-देशिक मे शरणम् **॥५॥**

जगतीमवितुं कलिताकृतयो
विचरन्ति महा-महसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो
भव शङ्कर-देशिक मे शरणम् **॥६॥**

गुरु-पुङ्गव पुङ्गव-केतन ते
समतामयतां न हि कोऽपि सुधीः।
शरणागत-वत्सल तत्त्व-निधे
भव शङ्कर-देशिक मे शरणम् **॥७॥**

विदिता न मया विशदैककला
न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां
भव शङ्कर-देशिक मे शरणम् **॥८॥**

## ॥ वेदान्तकक्षा-प्रार्थना ॥

ॐ सहनाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

सदाशिव-समारम्भां शङ्कराचार्य-मध्यमाम्।
अस्मदाचार्य-पर्यन्तां वन्दे गुरु-परम्पराम् **१॥**

श्रुति-स्मृति-पुराणानामालयं करुणालयम् ।
नमामि भगवत्पाद-शङ्करं लोकशङ्करम् ॥ २॥

शङ्करं शङ्कराचार्य केशवं बादरायणम्।
सूत्र-भाष्य-कृतौ वन्दे भगवन्तौ पुनः पुनः **॥३॥**

ईश्वरो गुरुरात्मेति मूर्ति-भेद-विभागिने।
व्योमवद् व्याप्त-देहाय दक्षिणामूर्तये नमः **॥४॥**

समस्त-जन-कल्याणे निरतं करुणामयम्।
नमामि चिन्मयं देवं सद्गुरुं ब्रह्मविद्वरम् **॥५॥**

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ शङ्करारति ॥

आरति श्रीशङ्कराचार्य की।

जगद्गुरु श्रीभगवत्पाद की ॥

आरति शङ्कर की ॥

श्रुति-पुराण-स्मृति-विद्या-निधि की।

ब्रह्म-निष्ठ स्वानन्द-रमण की।

करुणालय मानव-हित-रत की।

आरति श्रीशङ्कराचार्य की

आरति शङ्कर की **॥१॥**

वेद-धर्म-गौरव-रक्षक की।

श्रुति-अद्वैत-तत्त्व-बोधक की।

शोभा श्रीसर्वज्ञ-पीठ की।

आरति श्रीशङ्कराचार्य की।

आरति शङ्कर की **॥२॥**

चतुर्दिशा-मठ-स्थापक-ऋषि की।

भक्त-वर्य ईश्वर-स्तुति-कवि की। नित्य-बोध-रवि-ज्योति-स्वरूप की

आरति श्रीशङ्कराचार्य की

आरति शङ्कर की **॥३॥**

## **॥ श्रीगुरु-स्तोत्रम् ॥**

अखण्ड-मण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः **॥१॥**

अज्ञान-तिमिरान्धस्य ज्ञानाञ्जन-शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः **॥२॥**

गुरुब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः **॥३॥**
स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः **॥४॥**

चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः **॥५॥**
सर्व-श्रुति-शिरो-रत्न-विराजित-पदाम्बुजः ।
वेदान्ताम्बुज-सूर्यो यः तस्मै श्रीगुरवे नमः **॥६॥**

चैतन्यः शाश्वतः शान्तः व्योमातीतो निरञ्जनः।
बिन्दु-नाद-कलातीतः तस्मै श्रीगुरवे नमः **॥७॥**

ज्ञान-शक्ति-समारूढः तत्त्वमालाविभूषितः ।
भुक्ति-मुक्ति-प्रदाता च तस्मै श्रीगुरवे नमः **॥८॥**

अनेक-जन्म-सम्प्राप्त-कर्म-बन्ध-विदाहिने।
आत्म-ज्ञान-प्रदानेन तस्मै श्रीगुरवे नमः **॥९॥**

शोषणं भव-सिन्धोश्च ज्ञापनं सार-सम्पदः।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः **॥१०॥**

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।
तत्त्व-ज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः **॥११॥**

मन्नाथः श्रीजगन्नाथः मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्व-भूतात्मा तस्मै श्रीगुरवे नमः **॥१२॥**

गुरुरादिरनादिश्च गुरुः परम-दैवतम्।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः **॥१३॥**

त्वमेव माता च पिता त्वमेव।
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव।
त्वमेव सर्वं मम देव-देव **॥१४॥**

## ।। मेधा सूक्तम् ।।

ॐ यश्छन्दसामृषभो विश्वरूपः ।
छन्दोभ्योऽध्यमृतात्सम्बभूव ।
स मेन्द्रो मेधया स्पृणोतु ।
अमृतस्य देवधारणो भूयासम् ।
शरीरं मे विचर्षणम् ।
जिह्वा मे मधुमत्तमा ।
कर्णाभ्यां भूरिविश्रुवम् ।
ब्रह्मणः कोशोऽसि मेधया पिहितः ।
श्रुतं मे गोपाय ।।
ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ।
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया ।
त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ।।
मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा ।
अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा ।।
आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ।।
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ।
मयि मेधां मयि प्रजां मयीन्द्रो इन्द्रियं दधातु ।
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।।

[ॐ हंस हंसाय विद्महे परमहंसाय धीमहि ।

तन्नो हंसः प्रचोदयात् ॥]

ॐ सरस्वत्यै च विद्महे विधिवल्लभायै च धीमहि।

तन्नो वाणिः प्रचोदयात् ।

ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ देवता-प्रार्थनाः ॥

जय गणेश जय गणेश जय गणेश पाहि माम्।
श्रीगणेश श्रीगणेश श्रीगणेश रक्ष माम् ॥

शरवणभव शरवणभव शरवणभव पाहि माम्।
कार्तिकेय कार्तिकेय कार्तिकेय रक्ष माम् ॥

जय सरस्वति जय सरस्वति जय सरस्वति पाहि माम्।
श्रीसरस्वति श्रीसरस्वति श्रीसरस्वति रक्ष माम् ॥

जयगुरु शिवगुरु हरिगुरु राम
जगद्गुरु परं-गुरु सद्गुरु श्याम ॥

ॐ आदि-गुरु अद्वैत-गुरु आनन्द-गुरु ॐ।
चिद्-गुरु चिद्घन-गुरु चिन्मय-गुरु ॐ ॥

हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

ॐ नमः शिवाय नमः शिवाय नमः शिवाय ॐ।
ॐ नमः शिवाय नमः शिवाय नमः शिवाय ॐ ॥

ॐ नमो नारायणाय ॐ नमो नारायणाय।
ॐ नमो नारायणाय ॐ नमो नारायणाय ॥

ॐ नमो भगवते वासुदेवाय ।
ॐ नमो भगवते वासुदेवाय ॥

आञ्जनेय आञ्जनेय आञ्जनेय पाहि माम्।
हनूमन्त हनूमन्त हनूमन्त रक्ष माम् ॥

दत्तात्रेय दत्तात्रेय दत्तात्रेय पाहि माम्।
दत्त-गुरु दत्त-गुरु दत्त-गुरु रक्ष माम् ॥

शङ्कराचार्य शङ्कराचार्य शङ्कराचार्य पाहि माम्।
भगवत्पाद भगवत्पाद भगवत्पाद रक्ष माम् ॥

सद्गुरुदेव सद्गुरुदेव सद्गुरुदेव पाहि माम्।
चिन्मयानन्द चिन्मयानन्द चिन्मयानन्द रक्ष माम्॥

गङ्गाराणि गङ्गाराणि गङ्गाराणि पाहि माम्।
भागिरथि भागिरथि भागिरथि रक्ष माम् ॥

ॐ शक्ति ॐ शक्ति ॐ शक्ति पाहि माम्।
ब्रह्माशक्ति विष्णुशक्ति शिवशक्ति रक्ष माम् ॥

आदिशक्ति महाशक्ति पराशक्ति पाहि माम्।
इच्छाशक्ति क्रियाशक्ति ज्ञानशक्ति रक्ष माम् ॥

राजराजेश्वरि राजराजेश्वरि राजराजेश्वरि पाहि माम्। त्रिपुरसुन्दरि त्रिपुरसुन्दरि त्रिपुरसुन्दरि रक्ष माम् ॥

ॐ तत्सत् ॐ तत्सत् ॐ तत्सत् ॐ।
ॐ शान्ति ॐ शान्ति ॐ शान्ति ॐ ॥

# ॥ सत्सङ्ग-शान्तिमन्त्राः ॥

ॐ स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितः ब्राह्मणाः सन्तु निर्भयाः ॥

सर्वेषां स्वस्तिर्भवतु सर्वेषां शान्तिर्भवतु ।
सर्वेषां पूर्णं भवतु सर्वेषां मङ्गलं भवतु ॥
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

ॐ असतो मा सद्गमय।
तमसो मा ज्योतिर्गमय।
मृत्योर्माऽमृतं गमय ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# देवापराध क्षमापन स्तोत्र

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम्॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत्।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव॥

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति॥

RadheRadheje®